## शर्कराया वा। (८३/१३०२)

शर्कराशब्दादुत्पन्नस्य चातुरर्थिकस्य [1]प्रत्ययस्य वा लुब् भवति। [2]वाग्रहणं [3]किम्, यावता शर्कराशब्दः कुमुदादिषु वराहादिषु च पठ्यते, तत्र पाठसामर्थ्यात्[4] प्रत्ययस्य पक्षे श्रवणं [5]भविष्यति ? एवं [6]तह्र्येतज् ज्ञापयति, शर्कराशब्दाद् औत्सर्गिको[7] भवति, [8]तस्यायं [9]विकल्पितो लुप् इति। शर्करा। शार्करम्। गणपाठाच्च [10]श्रवणमुत्तरसूत्रे विहितौ च द्वौ प्रत्ययौ, तदेवं षड् रूपाणि भवन्ति। शर्करा, शार्करम्, शर्करिकम्, शार्करकम्, शार्करिकम्, [11]शर्करीयम् इति॥

## ठक्छौ च। (८४/१३०३)

शर्कराशब्दात् ठक् छ[12]इत्येतौ प्रत्ययौ भवतश्चातुरर्थिकौ। यथासम्भवमर्थसम्बन्धः। शार्करिकम्। [13]शर्करीयम्॥

## नद्यां मतुप्। (८५/१३०४)

नद्यामभिधेयायां मतुप् प्रत्ययो भवति [14]चातुरर्थिकः। तन्नाम्नो देशस्य विशेषणं नदी। [15]उदुम्बरा यस्यां[16] सन्ति उदुम्बरावती। मशकावती। [17]वीरणावती। पुष्करावती। [18]इक्षुमती। [19]द्रुमती। इह कस्मान्न भवति, भागीरथी, [20]भैमरथी[21] ? मतुबन्तस्यात[22]न्नामधेयत्वात्॥

## मध्वादिभ्यश्च। (८६/१३०५)

मधु इत्येवमादिभ्यः शब्देभ्यो मतुप् प्रत्ययो भवति चातुरर्थिकः। [23]अनद्यर्थ आरम्भः। मधुमान्[24]। बिसवान्।

मधु। बिस। स्थाणु। [25]मुष्टि। इक्षु। वेणु। रम्य। [26]ऋक्ष। [27]कर्कन्धु। शमी। [28]किरीर। [29]हिम। किशरा। [30]शर्पणा। [31]मरुत्। मरुव। दार्वाघाट। शर। इष्टका। तक्षशिला। शक्ति। आसन्दी। [32]आसुति। शलाका। [33]आमिधी। [34]खडा। [35]वेटा। मध्वादिः॥

## कुमुदनडवेतसेभ्यो ड्मतुप्। (८७/१३०६)

कुमुद नड वेतस इत्येतेभ्यः [36]शब्देभ्यः ड्मतुप् प्रत्ययो भवति चातुरर्थिकः। कुमुद्वान्। नड्वान्। वेतस्वान्।

[४३०] महिषाच्चेति वक्तव्यम्। (म. भा. २.२८८)

महिष्मान् [37]नाम देशः॥

---

1. प्रत्ययस्य नास्ति क, वा नास्ति फ.ह. 2. अथ इत्यधिकम् ब. 3. किमर्थम् फ. 4. एव इत्यधिकम् फ. 5. भवति फ. 6. तर्हि तत् इ. 7. अपि इत्यधिकम् ब.क.ड.इ.फ.ह. 8. अयं नास्ति फ. 9. विकल्पेन ह. 10. भवति इत्यधिकम् फ, उत्तरसूत्रविहितौ ब. इ. 11. शार्करीयम् क. ह. 12. च इत्यधिकम् फ. 13. शार्करीयम् क. ह. 14. चातुरर्थिकः नास्ति फ. 15. उदुम्बरा यस्यां सन्ति नास्ति फ. ह. 16. नद्याम् इत्यधिकम् ब. 17. वारणावती ब, नास्ति फ, वीणावती ह. 18. इक्षुवती ह. 19. द्रुमवती ह. 20. हैमरथी ड. फ. ह. 21. इति इत्यधिकम् ब. क. 22. नामधेयित्वात् क. 23. अनद्यर्थ आरम्भः नास्ति फ. 24. देशः इत्यधिकम् ग. ह. 25. ऋष्टिः क, रुष्टि ब. इ. 26. नास्ति ब, ऋष्य इ. 27. शकन्धु फ. 28. करीर ब. क. फ. ह. 29. हिमा ब. 30. शर्वरा ब, सर्याण क, शर्यात फ, शर्याणा ह. 31. मरुष क, वार्दाली ब. फ. समानवाल्मिकि ह. 32. असुतिः क, आसुर्कि ह. 33. आभिधी ब. 34. खण्डा ब. ड. 35. वेदा ब. ड. 36. शब्देभ्यः नास्ति क. इ. फ. 37. नाम देशः नास्ति ह.